# 2024

## SANSKRIT — HONOURS

### Paper : DSE-B-1

### (KĀVYA)

### Full Marks : 65

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Section – A

### Unit – I

### (Marks : 20)

1. अधोलिखितेषु यथेच्छम् ***एकस्यो***त्तरं संस्कृतभाषया देवनागरलिप्या च लेख्यम्।

(a) साहित्यदर्पणस्य प्रथमपरिच्छेदमनुसृत्य विश्वनाथसमर्थितं काव्यप्रयोजनं विव्रियताम्। 10

(b) मम्मटनिरूपितकाव्यलक्षणे प्रयुक्तस्य 'सगुणौ' इति पदस्य अनावश्यकता विश्वनाथमतमनुसृत्य विचार्यताम्। 10

(c) कः वक्रोक्तिजीवितकारः? तस्य मतं यथा विश्वनाथेन खण्डितं तत् पर्यालोच्यताम्। 2+8

2. अधोलिखितेषु ***विषयद्वय***मवलम्ब्य संस्कृतभाषया देवनागरलिप्या च टीका लेखनीया। 5×2

(a) आनन्दवर्धनः।

(b) रीतिः।

(c) रसाभासः।

(d) भावः।

### Unit – II

### (Marks : 25)

3. अधोलिखितेषु यथामति ***एकस्यो***त्तरं संस्कृतभाषया देवनागरलिप्या च लेख्यम्।

(a) विश्वनाथसम्मतं वाक्यलक्षणं लिखित्वा प्रतिपदव्यावृत्तिपूर्वकं विचार्यताम्। 2+8

(b) को नाम सङ्केतः? विश्वनाथमतानुसारेण सङ्केतितार्थस्य बोधने अभिधायाः कार्यकारित्वं विव्रियताम्। 3+7

(c) विश्वनाथसम्मतं व्यञ्जनास्वरूपं व्याख्याय लक्षणामूलायाः व्यञ्जनायाः स्वरूपं सोदाहरणं विचार्यताम्। 5+5

4. अधोलिखितेषु ***कस्यचिदेकस्य*** संस्कृतभाषया देवनागरलिपया च व्याख्या करणीया। 7×1

(a) वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः।

(b) रूढेः प्रयोजनाद् वासौ लक्षणा शक्तिरर्पिता।

(c) आरोपाध्यावसानाभ्यां प्रत्येकं ता अपि द्विधा।

5. अधोलिखितेषु ***द्वयोः*** टीका संस्कृतभाषया देवनागरलिपया च लेखनीया। 4×2

(a) महावाक्यम्।

(b) योग्यता।

(c) लक्षणलक्षणा।

(d) तात्पर्यार्थः।

## Unit – III

## (Marks : 20)

6. अधोलिखितेषु ***षट् प्रश्नाः*** संक्षेपेण पूर्णवाक्येन च संस्कृतभाषया देवनागरलिपया च समाधेयाः। 2×6

(a) स्थायिभावः कदा रसतामेति?

(b) केषां जनानां रसस्य आस्वादनं भवेत्?

(c) के नाम सात्त्विकभावाः?

(d) व्यभिचारिभावाः कतिविधाः?

(e) विश्वनाथस्य मते अनुभावस्य लक्षणं किम्?

(f) स्थायिभावाः कतिविधाः?

(g) शृङ्गाररसे नायकस्य के सहायाः?

(h) विभावभेदः नामतः लिख्यताम्।

(i) विश्वनाथस्य मते रसास्वादं प्रति कस्य हेतुत्वम्?

7. अधोलिखितेषु ***कस्यचिदेकस्य*** संस्कृतभाषया देवनागरलिपया च व्याख्या कार्या। 8×1

(a) करुणादावपि रसे जायते यत् परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्॥

(b) रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।

(c) अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः।

---